प्रश्न पत्र–प्रारुप – III

संस्कृत

समय : होरात्रयम्    दशमी कक्षा    पूर्णांक : ४०

Time : 3 Hours

सामान्य निर्देशा :

(i) अस्मिन् प्रश्न पत्रे चत्वारः खण्डाःसन्ति।
(इस प्रश्न पत्र में चार खण्ड हैं ।)

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(प्रत्येक खण्ड का उत्तर एक ही स्थान में क्रम से लिखना है।)

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि ।
(सभी प्रश्नों का उत्तर संस्कृत में ही लिखना है । )

**खण्डः 'क' अपठित अवबोधनम्** १०

1. एकदा एकः नरः सरोवर–तटे अभ्रमत् । सः गम्भीर–चिन्तने रतः आसीत् । सहसा वानराणां शब्दैः तस्य ध्यानभंगः अभवत् । सः अपश्यत् यत् रक्तवर्णाः अतिविकरालवानराः नातिदूरे आसन् । सः धावितुम् आरभत् । तं धावन्तं दृष्ट्वा वानराः अपि अनुधावितवन्तः । भीतः सः तीव्रग्रत्या धावितुम् आरभत् । मा धाव! भयं त्यक्त्वा तत्रैव स्थिरः भव" इति कस्यचित् वृद्धजनस्य उच्चस्वरं श्रुत्वा सः तथैव अकरोत् । स्थिरं तं दृष्ट्वा वानराः अपि तत्रैव स्थितवन्तः । साहसं कृत्वा निर्भीकदृष्ट्या स वानरान् अपश्यत् । तं निर्भीकं दृष्ट्वा वानरसमूहः पलायितः । अहो आश्चर्यम् ! कीदृशः चमत्कारः ! अनेन अनुभवेन तस्य ज्ञान–चक्षुषी उन्मीलिते । तेन ज्ञायते यत् आपत्तिभ्यः मुक्तिः दृढ़संकल्पेन, साहसेन धैर्येण च भवति न ताभ्यः पलायनेन । जानन्ति भवन्तः एषः नरः कः आसीत्? एषः आसीत् स्वामिविवेकानंदः ।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें । ) $1\times2 = 2$

(i) कः महात्मा सरोवर–तटे भ्रमति स्म ?

(ii) केषां शब्दैः विवेकानंदस्य ध्यानभंग : संजातः ?

II. पूर्णवाक्येन उत्तरत–(पूर्ण वाक्य में उत्तर दें । ) $2\times2 = 4$

(i) वानराः कीड्शाः आसन् ?

(ii) आपत्तिभ्यः मुक्तिः कथं भवति ?

III. निम्नलिखितप्रश्नानां समुचितं उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत– (निम्नलिखित प्रश्नों के सही उत्तर दिए गए विकल्पों में से चुनकर लिखें ।) $\frac{1}{2}\times4 = 2$

अनेन अनुभवेन तस्य ज्ञान चक्षुषी समुन्मीलिते ।

(i) अत्र 'तस्य' सर्वनामपदं कस्मै प्रयुक्तम् ?
(क) वृद्धाय (ख) जनाय (ग) वानराय (घ) नराय

(ii) 'समीपे' इत्यास्मिन् अर्थे कः शब्दः प्रयुक्तः ?
(क) दूरे (ख) अतिदूरे (ग) निकटे (घ) नातिदूरे

(iii) 'नेत्रे' इति पदस्य कः पर्यायः गद्यांशे प्रयुक्त : ?
(क) चक्षुषी (ख) ज्ञान (ग) चक्षुः (घ) चक्षूषि

(iv) अनुच्छेदे 'बन्धनम्' इति पदस्य किं विलोमपदं प्रयुक्तम् ?
(क) धैर्यम् (ख) साहसम् (ग) स्थिरम् (घ) मुक्तिः

IV. अस्य गद्यांशस्य कृते एकं समुचितं शीर्षकं लिखत – (इस गद्यांश के लिए एक समुचित शीर्षक लिखें) 2

## खण्ड : 'ख' (रचनात्मकं कार्यम्)

2. पत्रलेखनम् –

भवान् रामशङकरः जन्मोत्सवे कालघटिकायाः पुरस्कारं वाञ्छति। पितरं प्रति लिखितं पत्रं मञ्जूषायाः उचितं पदं चित्वा पत्रं पूरयत– आप रमाशंकर जन्म–दिवस के उत्सव पर घड़ी भेंट चाहते हैं । पिता के पास लिखे गए पत्र को मञ्जूषा से उचित पद चुनकर पूरा करें । $\frac{1}{2}\times10 = 5$

...............(i).................

परमादरणीया : .........(ii).......... दिनांकः 5.2.2019

सदरं प्रणमामि !

..................(III)......................कुशलं तत्रास्तु । भवता स्वपत्रे पृष्टं यत् जन्मदिवसस्य ...................(IV)...................... अहं किम् वाञ्छामि ? अहं तु .......... (V) ...............कालघटिकाम् इच्छामि/छात्रावासे सर्वाणि कार्याणि ................(VI) ................. भवन्ति परं निश्चितकालात् भोजन–व्यवस्था न वर्तते । प्रातः पञ्चवादने जागरणम् ..................(VII) ........ । अत : नियमपालनाय घटिका अत्यावश्यकी । अनया ...........(VIII) ...... .....अपि दैनिककार्येषु नियमितः भविष्यामि । शेषं सर्वं कुशलम्। मम जनन्यै अग्रजाय च सादरं .................(IX) .............।


भवदीयःपुत्रः

.........(X)...........

मञ्जूषा

(अत्र, यथासमयम्, अत्यावश्यकम्, प्रणामाः, छात्रावासः, उपहाररुपेण, एकां, पितृमहाभागाः, अन्येषु, रमाशङ्करः)

3. अधोदत्तं चित्रं दृष्ट्वा मजूषापदसहायतया पचवाक्येषु संकृतेन अनुच्छेदं लिखत । (दिए गए चित्र को देखकर मजूषा के पदों की सहायता से पाँच वाक्यों में संस्कृत में अनुच्छेद लिखें ।) 2×5 = 10



मंजूषा : – (उपवनम्, खगाः, आकाशे दोलाम्, पुष्पाणि, नारी, सूर्य, द्वे, वर्तिके, राजमार्गः, बालकः, बालिका, भ्रम्)

अथवा

'बालदिवस–समारोहः' इति विषयम् अधिकृत्य मंजूषायां दन्तैः पदैः पंचवाक्यानि संस्कृतेन लिखत – 'बाल दिवस–समारोह' विषय पर मंजूषा में दिए गए पदों से पाँच वाक्य संस्कृत में लिखें मंजूषा : – (विद्यालये, अध्यापकाः, छात्राः, गतवर्षे, पुरस्कारः, पं० नेहरु, उत्साहेन मान्यते, प्रथमम्, प्रमुदितमनः, भारतवर्षे)

## खण्ड : 'ग' (अनुप्रयुक्तण्याकरणम्) 25

4. अधोलिखितेषु वाक्येषु रेखाङ्किपदानां सन्धि सन्धिच्छेदं वा कृत्वा लिखत (निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि या सन्धि–विच्छेद कर लिखें ।) 1×4 = 4

(I) **पौ + अकः** आत्मानं न दहति ।

(II) सम्प्रति वयं **संस्कृतं** पठामः ।

(III) जगत्पतेः **सृष्टिः + एषा** रमणीया ।

(IV) **वृक्षच्छाया** शीतला भवति

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेम्यः चित्वा लिखत – (निम्नलिखित वाक्यों में रेखांकित पदों का समास य विग्रह विकल्पों में से चुनकर लिखें । ) 1×4 = 4

(I) राजपुरुषाः चौरं भृशं ताडयामास ।

(क) राज्ञःपुरुषाः (ख) राजानम् पुरुषाः

(ग) राज्ञि पुरुषाः (घ) राजा पुरुषाः

(II) आखेटकः मृगस्थ पश्चात् धावति ।

(क) उपमृगम् (ख) अनुमृगम्

(ग) अधिमृगम् (घ) समृगम्

(III) विद्यालये शिक्षक–दिवसस्य महोत्सवः आयोजिता ।

(क) महत् उत्सवः (ख) महती उत्सवः

(ग) महान् उत्सवः (घ) महा उत्सवः

(IV) वटुः अष्टाध्यायीं पठितुम् आरभत् ।

(क) अष्टानाम् अध्यायानां समाहार :

(ख) अष्ट अध्यायीनां समाहारः

(ग) अष्टस्य अध्यायस्य समाहारः

(घ) अष्टाः अध्यायाः

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति–प्रत्ययौ संयोज्य वियोज्य वा उचितम् उत्तरम् विकल्पेम्यः चित्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का प्रकृति–प्रत्यय जोड़कर या पृथक् कर उचित उत्तर विकल्पों में से चुनकर लिखें।) 1×4 = 4

(I) विद्यायाः **महत्वं** को न जानाति ।

(क) महत् + तल् (ख) महत् + त्व (ग) महत्+तमप्

(II) **भगवान्** सर्वत्र विराजते ।

(क) भग + वतुप् (ख) भग + मतुप् (ग) भग + तसिल्

(III) **कोकिल + टाप्** पञ्चमस्वरेण गायति ।

(क) कोकिलः (ख) कोकिला (ग) काकली

(IV) अस्माभिः हितोपदेशः नूनमेव **पठितण्यः** ।

(क) पठ् + क्त (ख) पठ् + क्तवतु (ग) पठ् + तण्यत्

7. अधोलिखितं संवादं मजूषायां दत्तैः पदैः वाच्य–परिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत–निम्नलिखित संवाद को मंजूषा में दिए पदों की सहायता वाच्य परिवर्तन कर पूरा करके पुनःलिखें।) 1×3 = 3

पिता – कुत्रअस्ति अद्यतनं समाचारपत्रम् ?

पुत्र : – इदं मम पार्श्वे अस्ति ।

पिता – किं ...............(I)..............समाचारपत्रं पठ्यते ?

पुत्र : – अहं तु केवलं खेल–चित्राणि पश्चामि ।

पिता – त्वया कस्य खेलस्य ...............(II)..............दृश्यन्ते ?

पुत्रः – मया क्रिकेट–क्रीडकानां चित्राणि .............(III)...............।

मंजूषा – (दृश्यन्ते, त्वया, चित्राणि)

8. अधोलिखितायां दिनचर्यायां रिक्त स्थानानि कालबोधकशब्दैः पूर्यन्ताम् – (निम्नलिखित दिनचर्या में रिक्त स्थानों को समय के बोधक शब्दों से पूरा करें ।) 1×2 = 2

(I) एकः कृषकःप्रातः ...........(5,00) वादने उत्तिष्ठिति ।

(II)सः हलकर्षणं कृत्वा सायं ..........(6.15) वादने गृहं प्रत्यागच्छति ।

9. अधोलिखितेषु वाक्येषु रिक्तस्थानानि मंजूषायां प्रदत्तै : उचितैः अण्ययपदैः पूरयित्वा लिखत – (निम्नलिखित वाक्यों में रिक्त स्थानों को दिए गए अण्यय पदों से पूरा करें ।) 1×4 = 4

(मा, कदा, इतस्ततः, शनैः शनैः)

(I) केशवः ............(I)............. विद्यालयं गच्छति ?

(II) प्रातःकाले पवनः ...............(II)...................वहति ।

(III) कदापि असत्यं ....................(III) ............ वद ।

(IV) सरमेयाः मार्गे ................(IV) ................धावन्ति ।

10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् अशुद्धम्अस्ति । अशुद्धंपदं संशोध्य लिखत – (निम्नलिखित पदों में रेखांकित पद अशुद्ध है। अशुद्ध पद को संशोधित कर लिखें । ) 1×4 = 4

(I) अहं **पक्वं** फलानि खादामि ।

(II) नृपः **निर्धनान्** अन्नं यच्छति ।

(III) भवन्त : कुत्र **गच्छाम** : ?

(IV) सः **बालिका** पत्रम् अलिखत् ।

## खण्ड : 'घ' (पठित–अवबोधनम्) 30

11. अधोलिखितं गद्यांशं, श्लोकं, नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत – (निम्नलिखित गद्यांश, श्लोक और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखें।)

(अ) गद्यांश :

इयमासीत् भैरवविभीषिका कच्छ भूकम्पस्य । पत्र्चोत्तर द्विसहस्र–खीष्टाब्दे (2005) ईस्वीये वर्षे । अपि कश्मीर प्रान्ते पाकिस्तान देशे च धरायाः महत्कम्पनं जातम् । यस्मात्कारणात् लक्षपरिमिताः जनाः अकालकालकवलिताः पृथ्वी कस्मात् कारणात् प्रकम्पते वैज्ञानिका : इति विषये कथयन्ति यत् पृथिण्याः अन्तर्गभे विद्यमानाः बृहत्यः पाषाणशिला यदा संघर्षणवशात् त्रुटयन्ति तदा जायते भीषणं संस्खलनं, संस्खलनजन्यं कम्पनं च। तदैव भयावहकम्पनं धरायाः उपरितलमप्यागत्य महाकम्पनं जनयति येन महाविनाशदृश्यं समुत्पद्यते ।

I. एकपदेन उत्तरत– (एक पद में उत्तर दें ।) $1\times2 = 2$
(I) भूकम्पस्य भैरवविभीषिका कुत्र अभवत् ?
(II) कति जनाः कालकवलिताः संजाताः ?
II. पूर्णवाक्येन उत्तरत – (पूर्णवाक्य में उत्तर दें ।) 2
वैज्ञानिकाः भूकम्पस्य विषये किं कथयन्ति ?
III. प्रदत्तेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत – (दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।) $\frac{1}{2}\times4 = 2$
(क) 'जायते' इति पदे कः लकारः प्रयुक्तः ?
(I) लङ् (II) लट् (III) लृट् (IV) लोट्
(ख) 'पाषाणशिलाः' इत्यस्य पदस्य समास–विग्रहं कुरुत–
(I) पाषाणाय शिला (II) पाषाणात् शिला
(III) पाषाणस्य शिलाः (IV) पाषाणे शिला

(ग) 'त्रुट्यन्ति' इति क्रियापदस्य कर्तृपदं किम् ?
(I) पाषाणशिलाः (II) पृथ्वी (III) जनाः (IV) वैज्ञानिकाः
(घ) 'येन' इति पदे मूलशब्दः कः अस्ति ?
(I) तत् (II) यत् (III) यत्र (IV) अदस्
(आ) श्लोक :
निमित्तमुदि्दश्य हिः यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तु परितोषयिष्यति ।।
I. एकपदेन उत्तरत– (एक पद में उत्तर दें ।) $1\times2 = 2$
(i) कंम् उद्दिश्य जनः प्रसीदति ?
(ii) निमित्तम् उद्दिश्य क्रोधी कथं प्रसन्नः भवति ?
II. पूर्णवाक्येन उत्तरत– (पूर्ण वाक्य में उत्तर दें।) 2
कीदृशंजनं कोडपि न परितोषयिष्यति ?
III. प्रदत्तेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत – दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें । $\frac{1}{2}\times4 = 2$
(क) 'उद्दिश्य' इति पदे कः प्रत्ययः प्रयुक्त : ?
(I) क्त्वा (II) ल्यप् (III) तुमुन्, (IV) क्तवतु
(ख) 'निश्चयेन' इत्यर्थे कः पर्यायः श्लोके आगतः ?
(I) प्रकुप्यति (II) प्रसीदति (III) अकारण (IV) ध्रुवम्
(ग) 'प्रसीदति' इत्यस्य पदस्य विलोमपदं चिनुत ।
(I) परितोषयिष्यति (II) मनः (III) प्रकुप्यति (IV) अपगमे
(घ) 'जनः' इति पदे का विभक्तिः प्रयुक्ता अस्ति ?
(I) सम्बन्ध (II) पञ्चमी (III) तृतीया (IV) प्रथमा

(इ) नाट्यांशः
चाणक्यः–भो श्रेष्ठिन् ! अलमाशङ्कया । भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति । ततस्तत्प्रच्छादनं दोषमुत्पादयति ।
चन्दनदासः–एवं नु इदम् । तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति ।
चाणक्यः–पूर्वम् 'अनृतम्', इदानीम् "आसीत्" इति परस्परविरुद्धे वचने ।
चन्दनदासः–आर्य ! तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति ।

चाणक्य : – अथेदानीम् क्व गतः ?
चन्दनदासः – न जानामि ।

I. एकपदेन उत्तरत – (एक पद में उत्तर दें ।) $1\times2 = 2$

(I) कीदृशाः पूर्वराजपुरुषाः देशान्तरं व्रजन्ति ?
(II) कस्य गृहजनाःच चन्दनदासस्य गृहे आसन् ?

II. पूर्णवाक्येन उत्तरत – (पूर्ण वाक्य में उत्तर दें ।) 2

चाणक्यः कीदृशे परस्परविरुद्धे वचने कथयति ?

III. प्रदत्तेभ्यः विकल्पेम्यः समुचितम् उत्तरं चित्वा लिखत– (दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें ।) $\frac{1}{2}\times4 = 2$

(क) 'देशान्तरम्' इति पदस्य सन्धि–विच्छेदं कुरुत –
(I) देशा+अन्तरम् (II) देश+अन्तरम्
(III) देशान्+अन्तरम् (IV) देशान्त+तरम्

(ख) 'ऋतम्' इत्यस्य पदस्य कः विपर्ययः नाट्यांशे प्रयुक्तः ?
(I) अनृतम् (II) भयम् (III) इदानीम् (IV) इदम्

(ग) 'गतः' इति पदे कः अस्ति ?
(I) क्तिन् (II) क्त (III) क्त्वा (IV) तण्यत्

(घ) 'जानामि' इति क्रियापदस्य संभावित कर्तृपदं किम् ?
(I) सः (II) त्वम् (III) अहम् (IV) सा

12. रेखांकितपदानि आधृत्य प्रश्न–निर्माणं कुरुत – (रेखांकित पदों के आधार पर प्रश्न–निर्माण करें ।)
(I) **आत्महितैषिभिः** सर्वदा व्यायामः कर्तव्यः ।
(II) पुरा त्वया **मह्यं** व्याघ्रत्रयं दत्तम् ।
(III) स्नानशुद्धयातिथये **तैलमामलकं** प्रायच्छत् ।
(IV) राजा **जिज्ञासाया** : समाधानाय मुनेः पार्श्वमगच्छत् ।

13. अधोलिखितश्लोकद्धयस्य अन्वयं प्रदत्तविकल्पेभ्यः चित्वा । पूरयत–नीचे लिखे दोनों श्लोकों का अन्वय दिए गए विकल्पों में से चुनकर लिखें ।) $\frac{1}{2}\times8 = 4$

(अ) सम्पत्तौ च विपत्तौ च महतामेकरुपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ।।
अन्वयः– महताम् .............(i)..........विपत्तौ च ......(ii)....भवति ।
सविता....(iii)..... रक्तः(भवति) तथा अस्तमये च....(iv)...(भवति) ।

(आ) एक एव खगो मानी वने वसति चातक : ।
पिपासितो वा म्रियते याधते वा पुरन्दरम् ।।
अन्वयः– एक एव .............(i)..........खगः चातक ......(ii) वसति
(सः) पिपासितः ......(iii)........ पुरन्दरम् .........(iv) वा।
मंजूषा–(रक्तः, याचते, मानी, वने, संपत्तौ, म्रियते, उदये, एकरुपता)

14. अधोलिखितकथनानां समुचितं भावं प्रदत्त विकल्पेभ्यः चित्वा लिखत– (निम्नलिखित कथनों का भाव दिए गए विकल्पों में से चुनकर लिखें।)

**(क)** पक्षीणां कलखं चेतः प्रसादयति ।
(i) प्राणिनः मनसः प्रसादम् इच्छन्ति ।
(ii) कलखं श्रवणे अप्रियं भवति ।
(iii) मधुरं कूजन्ति खगाः ।
(iv) चित्तः सदा व्याकुलः भवति ।

**(ख)** विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।
(i) बुद्धिहीनाः विनश्यन्ति ।
(ii) बुद्धिर्यस्य बलं तस्य ।

(iii) भाग्यं फलति सर्वदा ।

(iv) बुद्धिमती व्याघ्रमारी आसीत् ।

**(ग)** नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।

(i) व्यवहारेण मित्राणि जायन्ते ।

(ii) उद्यमेन कार्याणि यदा–कदा सिद्धयन्ति ।

(iii) आलसी दुःखं सहते ।

(iv) उद्यमः अनन्यः बन्धुः मन्यते ।

**(घ)** प्राणेभ्यः अपि प्रियः सुहृद्

(i) प्राणरक्षा परो धर्मः ।

(ii) सुहृद् जीवने अमूल्यः निधिः ।

(iii) अति प्रियः सुहृद् ।

(iv) प्राणान्ते किं करिष्यति ।